# Manikyavachaka Ashtottarashata Nama Stotram

# माणिक्यवाचकाष्टोत्तरशतनामस्तोत्रम्

## Document Information

Text title : Manikyavachaka Ashtottarashata Nama Stotram

File name : mANikyavAchakAShTottarashatanAmastotram.itx

Category : shiva, aShTottarashatanAma, stotra

Location : doc_shiva

Proofread by : Aruna Narayanan

Description/comments : From Atmanatha Stuti Manjari, Ed. S. V. Radhakrishna Sastri. See corresponding nAmAvalI.

Latest update : December 12, 2022

Send corrections to : Sanskrit@cheerful.com

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

Please note that proofreading is done using Devanagari version and other language/scripts are generated using **sanscript**.

December 22, 2022

*sanskritdocuments.org*

# माणिक्यवाचकाष्टोत्तरशतनामस्तोत्रम्

अक्षस्रक्पुस्तकोद्भासिहस्तं माणिक्यवाचकम् ।
काश्यपं समयाचार्यं दाक्षिणात्यं उपास्महे ॥ १॥

ॐ । मार्ताण्डतेजा माणिक्यवाचको माननिर्भरः ।
महेन्द्रवरदो मन्त्री मायाविरहितात्मवान् ॥ २॥

मारबाधाविनिर्मुक्तो मारतूणीरजङ्घिकः ।
मारुताशफणाभूषो महेश्वरजनेश्वरः ॥ ३॥

मातृकान्यासनिरतो मातृपादाब्जपूजकः ।
मायापायविनिर्मुक्तो मानदो मार्गदर्शकः ॥ ४॥

मारवैरिकृपापात्रायमानोत्तमवाग्झरः ।
मायावादविनिर्जेता महातीर्थकृतादरः ॥ ५॥

निरन्तरो नित्यतपा नित्यतृप्तो निधीश्वरः ।
निष्कलङ्को निरीहश्च नियतो निरहङ्कृतिः ॥ ६॥

निमित्तज्ञो निराधारो निर्ममो नित्यरञ्जनः ।
नित्योत्साहो निरातङ्को नियतिज्ञो नियामकः ॥ ७॥

नियन्ता निगमार्थाब्धिवर्धनोत्थनिशापतिः ।
कर्मण्यः करुणापूर्णः कारणज्ञः कवीश्वरः ॥ ८॥

कालज्ञः कुलकृत्कल्यः कलानाथमुखोज्ज्वलः ।
कम्बुकण्ठः कलाज्ञानः कैवल्यपदबोधकः ॥ ९॥

करपद्मधृताक्षस्रक्पुस्तकः कनकाम्बरः ।
कटीतटीलसत्सूत्रः कौपीनवरधारकः ॥ १०॥

कीर्तिमान्कामारिभक्तः कामपाशविवर्जितः ।
वातग्रामाधिपो वाग्मी वातूलागमपारगः ॥ ११॥

वाग्व्याहारेशवचनो वाचस्पति समानधीः ।
वाराणसीवासरतो वाङ्माधुर्यजितामृतः ॥ १२॥

वातापितापनसखो वायुरोगविवर्जितः ।
वाचालको वाहिनीशो वाच्यवाचकसुन्दरः ॥ १३॥

वाङ्मनोतीतविभवो वासुदेवपदप्रियः ।
वाराहीमन्त्रराड्ज्ञप्ता वामदेवस्तुतिप्रियः ॥ १४॥

वामाङ्गसुन्दरतनुर्वाण्याराधनतत्परः ।
चतुरश्चण्डवीर्यश्च चण्डाज्ञश्चन्द्रशीतलः ॥ १५॥

चण्डांशुसदृशज्योतिश्चतुर्वेदाब्धिपारगः ।
चाञ्चल्यभिच्चमत्कारी चातुर्वर्ण्यानुपालकः ॥ १६॥

चन्द्रशेखरभक्तश्च चन्द्रार्काग्निसमप्रभः ।
चराचरजगन्मित्रं चिन्मूर्तिश्चञ्चलाद्युतिः ॥ १७॥

चतुर्वक्त्रमुखोत्पन्नश्चरणाश्रितभूपतिः ।
चन्द्रचूडनिभौजाश्च चण्डेश्वरसमानधीः ॥ १८॥

कञ्जदृक्कल्याणशीलः काषाय वसनोज्ज्वलः ।
कवाटकठिनोरस्कः कन्दर्पसमकान्तिमान् ॥ १९॥

कार्पासयज्ञोपवीती कलिदोषनिकृन्तनः ।
करीन्द्रमन्दगमनः करुणारसशेवधिः ॥ २०॥

कलुषघ्नः कलालापः कवची काश्यपस्तथा ।
कनकाङ्गदधारी च कर्मग्रन्थिविमोचकः ॥ २१॥

कमलद्विड्द्विदद्वन्द्वः कमनीयः कुलेश्वरः ।
अष्टोत्तरमिदं नाम्नां शतं वातपुरीशितुः ॥ २२॥

त्रिसन्ध्यं यः पठेन्नित्यं वातरोगाद्विमुच्यते ।
योगाम्बिकासनाथस्य कृपापात्रं भवेच्च सः ॥ २३॥

इति श्रीमाणिक्यवाचकाष्टोत्तरशतनामस्तोत्रं सम्पूर्णम् ।

Proofread by Aruna Narayanan

Tirupperunthurai (also called the

Athmanathaswamy temple) is located in Avudaiyarkoil village, near Aranthangi in the Pudukkottai district of Tamil Nadu. It was built to honor Lord Shiva. The presiding deity is formless (Atmanatar); there is no Śivalingam but only a pedestal (AvudayAr) located in the sanctum, hence the name Avudayar Koil. The God faces South in this temple- in Dakshinamurthy or Guru form. His consort is worshipped as SivayoganAyaki (YogAmbAl) in iconless form. There is no Nandi bull icon as is conventional in almost all Shiva temples.

There is deep spiritual significance in this. Hinduism allows deity worship for the novice. As one’s devotion matures, one begins to contemplate the truth of formlessness of the Brahman. The temple has been designed to illustrate this theology. This one of the rarest Saivite shrines in whole of India to portray the supreme truth symbolically. Since the soul (athma) has no form, the deity is called Athmanathar.

Legend has it that Manickavasagar, one of the four Saivite savants, constructed the temple at Avudaiyarkoil.

*Manikyavachaka Ashtottarashata Nama Stotram*
pdf was typeset on December 22, 2022

Please send corrections to *sanskrit@cheerful.com*